# Dharmashasta or Harihara SahasranAmastotram

# ધર્મશાસ્તાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : dharmashAstAsahasranAmastotra

File name : dharmashAstAsahasranAmastotra.itx

Category : sahasranAma, deities_misc, ayyappa, stotra

Location : doc_deities_misc

Transliterated by : George Mathew george.seagull at gmail.com

Proofread by : George Mathew, PSA Easwaran

Latest update : February 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# ધર્મશાસ્તાસહસ્રનામસ્તોત્રમ્

ૐ પૂર્ણપુષ્કલામ્બાસમેત શ્રીહરિહરપુત્રસ્વામિને નમઃ ।
શ્રીધર્મશાસ્તાસહસ્રનામસ્તોત્રમ્ ।
અસ્ય શ્રીહરિહરપુત્રસહસ્રનામસ્તોત્રમાલામન્ત્રસ્ય
અર્ધનારીશ્વર ઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રીહરિહરપુત્રો દેવતા ।
હ્રાં બિજં, હ્રીં શક્તિઃ, હ્રૂં કીલકમ્ ।
શ્રીહરિહરપુત્રપ્રસાદસિધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હ્રીં તર્જનીભ્યાં નમઃ ।
હ્રૂં મધ્યમાભ્યાં નમઃ ।
હ્રૈં અનામિકાભ્યાં નમઃ ।
હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથાઙ્ગન્યાસઃ ।
હ્રાં હૃદયાય નમઃ ।
હ્રીં શિરસે સ્વાહા ।
હ્રૂં શિખાયૈ વષટ્ ।
હ્રૈં કવચાય હમ્ ।
હ્રૌં નેત્રત્રયાય વૌષટ્ ।
હ્રઃ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ -
ધ્યાયેદુમાપતિરમાપતિભાગ્યપુત્રં
વેત્રોજ્જ્વલત્કરતલં ભસિતાભિરામમ્ ।

વિશ્વૈકવિશ્વવપુષં મૃગયાવિનોદં
વાઞ્છાનુરૂપફલદં વરભુતનાથમ્ ॥

આશ્રયામકોમલવિશાલતનું વિચિત્ર-
વાસો વસાનમરુણોત્પલદામહસ્તમ્ ।
ઉત્તુઙ્ગરત્નમકુટં કુટિલાગ્રકેશં
શાસ્તારમિષ્ટવરદં શરણં પ્રપદ્યે ॥

પઞ્ચોપચારાઃ ।
લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં અગ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારપૂજાં સમર્પયામિ ।
મૂલમન્ત્રઃ - ઓં ઘ્રૂં નમઃ પરાય ગોપ્ત્રે નમઃ ॥

ૐ નમો ભગવતે ભૂતનાથાય ।
ૐ શિવપુત્રો મહાતેજાઃ શિવકાર્યધુરન્ધરઃ ।
શિવપ્રદશ્શિવજ્ઞાની શૈવધર્મસુરક્ષકઃ ॥ ૧॥

શઙ્ખધારી સુરાધ્યક્ષશ્ચન્દ્રમૌલિસ્સુરોત્તમઃ ।
કામેશઃ કામતેજસ્વી કામાદિફલસંયુતઃ ॥ ૨॥

કલ્યાણઃ કોમલાઙ્ગશ્ચ કલ્યાણફલદાયકઃ ।
કરુણાબ્ધિઃ કર્મદક્ષઃ કરુણારસસાગરઃ ॥ ૩॥

જગત્પ્રિયો જગદ્રક્ષો જગદાનન્દદાયકઃ ।
જયાદિ શક્તિસંસેવ્યો જનાહ્લાદો જિગીષુકઃ ॥ ૪॥

જિતેન્દ્રિયો જિતક્રોધો જિતદેવારિસઞ્ચયઃ ।
જૈમિન્યાદિર્ષિસંસેવ્યો જરામરણનાશકઃ ॥ ૫॥

જનાર્દનસુતો જ્યેષ્ઠો જ્યેષ્ઠાદિગણસેવિતઃ ।
જન્મહીનો જિતામિત્રો જનકેનાભિપૂજિતઃ ॥ ૬॥

પરમેષ્ઠી પશુપતિઃ પઙ્કજાસનપૂજિતઃ ।
પુરહન્તા પુરત્રાતા પરમૈશ્વર્યદાયકઃ ॥ ૭॥

પવનાદિ સુરૈઃ સેવ્યઃ પઞ્ચબ્રહ્મપરાયણઃ ।
પાર્વતીતનયો બ્રહ્મ પરાનન્દઃ પરાત્પરઃ ॥ ૮॥

બ્રહ્મિષ્ટો જ્ઞાનનિરતો ગુણાગુણનિરુપકઃ ।
ગુણાધ્યક્ષો ગુણનિધિઃ ગોપાલેનાભિપુજિતઃ ॥ ૯॥

ગોરક્ષકો ગોધનદો ગજારુઢો ગજપ્રિયઃ ।
ગજગ્રિવો ગજસ્કન્ધો ગભસ્તિર્ગોપતિઃ પ્રભુઃ ॥ ૧૦॥

ગ્રામપાલો ગજાધ્યક્ષો દિગ્ગજેનાભિપૂજિતઃ ।
ગણાધ્યક્ષો ગણપતિર્ગવાં પતિરહર્પતિઃ ॥ ૧૧॥

જટાધરો જલનિભો જૈમિન્યાદિર્ષિપૂજિતઃ ।
જલન્ધરનિહન્તા ચ શોણાક્ષશ્શોણવાસકઃ ॥ ૧૨॥

સુરાધિપશ્શોકહન્તા શોભાક્ષસ્સુર્યતૈજસઃ ।
સુરાર્ચિતસ્સુરૈર્વન્ધ્યઃ શોણાઙ્ગઃ શાલ્મલીપતિઃ ॥ ૧૩॥

સુજ્યોતિશ્શરવીરઘ્નઃ શરચ્ચન્દ્રનિભાનનઃ ।
સનકાદિમુનિધ્યેયઃ સર્વજ્ઞાનપ્રદો વિભુઃ ॥ ૧૪॥

હલાયુધો હંસનિભો હાહાહૂહૂ મુખસ્તુતઃ ।
હરિહરપ્રિયો હંસો હર્યક્ષાસનતત્પરઃ ॥ ૧૫॥

પાવનઃ પાવકનિભો ભક્તપાપવિનાશનઃ ।
ભસિતાઙ્ગો ભયત્રાતા ભાનુમાન્ ભયનાશનઃ ॥ ૧૬॥

ત્રિપુણ્ડ્રકસ્ત્રિનયનઃ ત્રિપુણ્ડ્રાઙ્ગિતમસ્તકઃ ।
ત્રિપુરઘ્નો દેવવરો દેવારિકુલનાશકઃ ॥ ૧૭॥

દેવસેનાધિપસ્તેજસ્તેજોરાશિર્દશાનનઃ ।
દારુણો દોષહન્તા ચ દોર્દણ્ડો દણ્ડનાયકઃ ॥ ૧૮॥

ધનુષ્પાણિર્ધરાધ્યક્ષો ધનિકો ધર્મવત્સલઃ ।
ધર્મજ્ઞો ધર્મનિરતો ધનુશ્શાસ્ત્રપરાયણઃ ॥ ૧૯॥

સ્થૂલકર્ણઃ સ્થૂલતનુઃ સ્થૂલાક્ષઃ સ્થૂલબાહુકઃ ।
તનૂત્તમસ્તનુત્રાણસ્તારકસ્તેજસામ્પતિઃ ॥ ૨૦॥

યોગીશ્વરો યોગનિધિર્યોગેશો યોગસંસ્થિતઃ ।
મન્દારવાટિકામત્તો મલયાચલવાસભૂઃ ॥ ૨૧॥

મન્દારકુસુમપ્રખ્યો મન્દમારુતસેવિતઃ ।
મહાભશ્ચ મહાવક્ષા મનોહરમદાર્ચિતઃ ॥ ૨૨॥

મહોન્નતો મહાકાયો મહાનેત્રો મહાહનુઃ ।
મરુત્પૂજ્યો માનધનો મોહનો મોક્ષદાયકઃ ॥ ૨૩॥

મિત્રો મેધા મહૌજસ્વી મહાવર્ષપ્રદાયકઃ ।
ભાષકો ભાષ્યશાસ્ત્રજ્ઞો ભાનુમાન્ ભાનુતૈજસઃ ॥ ૨૪॥

ભિષગ્ભવાનીપુત્રશ્ચ ભવતારણકારણઃ ।
નીલામ્બરો નીલનિભો નીલગ્રીવો નિરઞ્જનઃ ॥ ૨૫॥

નેત્રત્રયો નિષાદજ્ઞો નાનારત્નોપશોભિતઃ ।
રત્નપ્રભો રમાપુત્રો રમયા પરિતોષિતઃ ॥ ૨૬॥

રાજસેવ્યો રાજધનઃ રણદોર્દણ્ડમણ્ડિતઃ ।
રમણો રેણુકાસેવ્યો રાજનીચરદારણઃ ॥ ૨૭॥

ઈશાન ઇભરાટ્સેવ્ય ઈષણાત્રયનાશનઃ ।
ઇડાવાસો હેમનિભો હૈમપ્રાકારશોભિતઃ ॥ ૨૮॥

હયપ્રિયોહયગ્રીવો હંસો હરિહરાત્મજઃ ।
હાટકસ્ફટિકપ્રખ્યો હંસારૂઢેન સેવિતઃ ॥ ૨૯॥

વનવાસો વનાધ્યક્ષો વામદેવો વરાનનઃ ।
વૈવસ્વતપતિર્વિષ્ણુઃ વિરાડ્રૂપો વિશામ્પતિઃ ॥ ૩૦॥

વેણુનાદો વરગ્રિવો વરાભયકરાન્વિતઃ ।
વર્ચસ્વી વિપુલગ્રીવો વિપુલાક્ષો વિનોદવાન્ ॥ ૩૧॥

વૈણવારણ્યવાસશ્ચ વામદેવેનસેવિતઃ ।
વેત્રહસ્તો વેદવિધિર્વંશદેવો વરાઙ્ગકઃ ॥ ૩૨॥

હ્રીઙ્કારો હ્રીમ્મના હૃષ્ટો હિરણ્યઃ હેમસમ્ભવઃ ।
હૂતાશો હૂતનિષ્પન્નો હૂઁકારાકૃતિસુપ્રભઃ ॥ ૩૩॥

હવ્યવાહો હવ્યકરશ્ચાટ્ટહાસોઽપરાહતઃ ।
અણુરૂપો રૂપકરશ્ચાજરોઽતનુરૂપકઃ ॥ ૩૪॥

હંસમન્ત્રશ્ચ હુતભુક્ હેમામ્બરસ્સુલક્ષણઃ ।

નીપપ્રિયો નીલવાસાઃ નિધિપાલો નિરાતપઃ ॥ ૩૫॥

ક્રોડહસ્તસ્તપસ્ત્રાતા તપોરક્ષસ્તપાહ્વયઃ ।
મૂર્તાભિષિક્તો માની ચ મન્ત્રરૂપોઃ મૃડો મનુઃ ॥ ૩૬॥

મેધાવી મેદસો મુષ્ણુઃ મકરો મકરાલયઃ ।
માર્ત્તાણ્ડો મઞ્જુકેશશ્ચ માસપાલો મહૌષધિઃ ॥ ૩૭॥

શ્રોત્રિયશ્શોભમાનશ્ચ સવિતા સર્વદેશિકઃ ।
ચન્દ્રહાસશ્શમશ્શક્તઃ શશિભાસશ્શમાધિકઃ ॥ ૩૮॥

સુદન્તસ્સુકપોલશ્ચ ષડ્વર્ણસ્સમ્પદોઽધિપઃ ।
ગરલઃ કાલકણ્ઠશ્ચ ગોનેતા ગોમુખપ્રભુઃ ॥ ૩૯॥

કૌશિકઃ કાલદેવશ્ચ ક્રોશકઃ ક્રૌઞ્ચભેદકઃ ।
ક્રિયાકરઃ કૃપાલુશ્ચ કરવીરકરેરુહઃ ॥ ૪૦॥

કન્દર્પદર્પહારી ચ કામદાતા કપાલકઃ ।
કૈલાસવાસો વરદો વિરોચનો વિભાવસુઃ ॥ ૪૧॥

બભ્રુવાહો બલાધ્યક્ષઃ ફણામણિવિભુષણઃ ।
સુન્દરસ્સુમુખઃ સ્વચ્છઃ સફાસશ્ચ સફાકરઃ ॥ ૪૨॥

શરાનિવૃત્તશ્શક્રાપ્તઃ શરણાગતપાલકઃ ।
તીક્ષ્ણદંષ્ટ્રો દીર્ઘજિહ્વઃ પિઙ્ગલાક્ષઃ પિશાચહા ॥ ૪૩॥

અભેદ્યશ્ચાઙ્ગદાર્ઢ્યશ્ચ ભોજપાલોઽથ ભૂપતિઃ ।
ગૃધ્રનાસોઽવિષહ્યશ્ચ દિગ્દેહો દૈન્યદાહકઃ ॥ ૪૪॥

બાડવાપૂરિતમુખો વ્યાપકો વિષમોચકઃ ।
વસન્તસ્સમરક્રુદ્ધઃ પુઙ્ગવઃ પઙ્ગજાસનઃ ॥ ૪૫॥

વિશ્વદર્પો નિશ્ચિતજ્ઞો નાગાભરણભૂષિતઃ ।
ભરતો ભૈરવાકારો ભરણો વામનક્રિયઃ ॥ ૪૬॥

સિંહાસ્યસ્સિંહરૂપશ્ચ સેનાપતિસ્સકારકઃ ।
સનાતનસ્સિદ્ધરૂપી સિદ્ધધર્મપરાયણઃ ॥ ૪૭॥

આદિત્યરૂપશ્ચાપધરશ્ચામૃતાબ્ધિનિવાસભૂઃ ।
યુવરાજો યોગિવર્ય ઉષસ્તેજા ઉડુપ્રભઃ ॥ ૪૮॥

દેવાદિદેવો દૈવજ્ઞસ્તામ્રોષ્ઠસ્તામ્રલોચનઃ ।
પિઙ્ગલાક્ષઃ પિચ્છચૂડઃ ફણામણિવિભૂષિતઃ ॥ ૪૯॥

ભુજઙ્ગભૂષણો ભોગો ભોગાનન્દકરોઽવ્યયઃ ।
પઞ્ચહસ્તેન સમ્પૂજ્યઃ પઙ્ચબાણેનસેવિતઃ ॥ ૫૦॥

ભવશ્શર્વો ભાનુમયઃ પ્રાજાપત્યસ્વરુપકઃ ।
સ્વચ્છન્દશ્છન્દશ્શસ્ત્રજ્ઞો દાન્તો દેવો મનુઃ પ્રભુઃ ॥ ૫૧॥

દશભુક્ચ દશાધ્યક્ષો દાનવાનાં વિનાશનઃ ।
સહસ્રાક્ષશ્શરોત્પન્નઃ શતાનન્દસમાગમઃ ॥ ૫૨॥

ગૃધ્રાદ્રિવાસો ગમ્ભિરો ગન્ધગ્રાહોગણેશ્વરઃ ।
ગોમેધો ગણ્ઢકાવાસો ગોકુલૈઃ પરિવારિતઃ ॥ ૫૩॥

પરિવેષઃ પદજ્ઞાની પ્રિયઙ્ગુદ્રુમવાસકઃ ।
ગુહાવાસો ગુરુવરો વન્દનીયો વદાન્યકઃ ॥ ૫૪॥

વૃત્તાકારો વેણુપાણીર્વીણાદણ્ડધરોહરઃ ।
હૈમીડ્યો હોત્રુસુભગો હૌત્રજ્ઞશ્ચૌજસાં પતિઃ ॥ ૫૫॥

પવમાનઃ પ્રજાતન્તુપ્રદો દણ્ડવિનાશનઃ ।
નિમીડ્યો નિમિષાર્ધજ્ઞો નિમિષાકારકારણઃ ॥ ૫૬॥

લિગુડાભો લિડાકારો લક્ષ્મીવન્દ્યો વરપ્રભુઃ ।
ઇડાજ્ઞઃ પિઙ્ગલાવાસઃ સુષુમ્નામધ્યસમ્ભવઃ ॥ ૫૭॥

ભિક્ષાટનો ભીમવર્ચા વરકીર્તિસ્સભેશ્વરઃ ।
વાચોઽતીતો વરનિધિઃ પરિવેત્તાપ્રમાણકઃ ॥ ૫૮॥

અપ્રમેયોઽનિરુદ્ધશ્ચાપ્યનન્તાદિત્યસુપ્રભઃ ।
વેષપ્રિયો વિષગ્રાહો વરદાનકરોત્તમઃ ॥ ૫૯॥

વિપિનો વેદસારશ્ચ વેદાન્તૈઃ પરિતોષિતઃ ।
વક્રાગમો વર્ચવચા બલદાતા વિમાનવાન્ ॥ ૬૦॥

વજ્રકાન્તો વંશકરો વટુરક્ષાવિશારદઃ ।
વપ્રક્રીડો વિપ્રપૂજ્યો વેલારાશિશ્ચલાલકઃ ॥ ૬૧॥

કોલાહલઃ ક્રોડનેત્રઃક્રોડાસ્યશ્ચ કપાલભૃત્ ।
કુઞ્જરેડ્યો મઞ્જુવાસાઃક્રિયામાનઃ ક્રિયાપ્રદઃ ॥ ૬૨॥

ક્રીડાનાથઃ કીલહસ્તઃ ક્રોશમાનો બલાધિકઃ ।
કનકો હોતૃભાગી ચ ખવાસઃ ખચરઃ ખગઃ ॥ ૬૩ ॥

ગણકો ગુણનિર્દુષ્ટો ગુણત્યાગી કુશાધિપઃ ।
પાટલઃ પત્રધારી ચ પલાશઃ પુત્રવર્ધનઃ ॥ ૬૪ ॥

પિતૃસચ્ચરિતઃ પ્રેષ્ઠઃ પાપભસ્મઃ પુનશ્શુચિઃ ।
ભાલનેત્રઃ ફુલ્લકેશઃ ફુલ્લકલ્હારભૂષિતઃ ॥ ૬૫ ॥

ફણિસેવ્યઃ પટ્ટભદ્રઃ પટુર્વાગ્મી વયોઽધિકઃ ।
ચોરનાટ્યશ્ચોરવેષશ્ચોરઘ્નશ્શૌર્યવર્ધનઃ ॥ ૬૬ ॥

ચઞ્ચલાક્ષશ્ચામરકો મરીચિર્મદગામિકઃ ।
મૃડાભો મેષવાહશ્ચ મૈથિલ્યો મોચકોમનુઃ ॥ ૬૭ ॥

મનુરૂપો મન્ત્રદેવો મન્ત્રરાશિર્મહાદૃઢઃ ।
સ્થૂપિજ્ઞો ધનદાતા ચ દેવવન્દ્યશ્ચતારણઃ ॥ ૬૮ ॥

યજ્ઞપ્રિયો યમાધ્યક્ષ ઇભક્રીડ ઇભેક્ષણઃ ।
દધિપ્રિયો દુરાધર્ષો દારુપાલો દનૂજહા ॥ ૬૯ ॥

દામોદરોદામધરો દક્ષિણામૂર્તિરૂપકઃ ।
શચીપૂજ્યશ્શઙ્ખકર્ણશ્ચન્દ્રચૂડો મનુપ્રિયઃ ॥ ૭૦ ॥

ગુડરૂપો ગુડાકેશઃ કુલધર્મપરાયણઃ ।
કાલકણ્ઠો ગાઢગાત્રો ગોત્રરૂપઃ કુલેશ્વરઃ ॥ ૭૧ ॥

આનન્દભૈરવારાધ્યો હયમેધફલપ્રદઃ ।
દધ્યન્નાસક્તહૃદયો ગુડાન્નપ્રીતમાનસઃ ॥ ૭૨ ॥

ઘૃતાન્નાસક્તહૃદયો ગૌરાઙ્ગો ગર્વભઞ્જકઃ ।
ગણેશપૂજ્યો ગગનઃ ગણાનાં પતિરૂર્જિતઃ ॥ ૭૩ ॥

છદ્મહીનશ્શશિરદઃ શત્રૂણાં પતિરઙ્ગિરાઃ । (શશિધરઃ)
ચરાચરમયશ્શાન્તઃ શરભેશશ્શતાતપઃ ॥ ૭૪ ॥

વીરારાધ્યો વક્રગમો વેદાઙ્ગો વેદપારગઃ ।
પર્વતારોહણઃ પૂષા પરમેશઃ પ્રજાપતિઃ ॥ ૭૫ ॥

ભાવજ્ઞો ભવરોગઘ્નો ભવસાગરતારણઃ ।

ચિદગ્નિર્દેહશ્ચિદ્રૂપશ્ચિદાનન્દશ્ચિદાકૃતિઃ ॥ ૭૬॥

નાટ્યપ્રિયો નરપતિર્નરનારાયણાર્ચિતઃ ।
નિષાદરાજો નીહારો નેષ્ટા નિષ્ઠૂરભાષણઃ ॥ ૭૭॥

નિમ્નપ્રિયો નીલનેત્રો નીલાઙ્ગો નીલકેશકઃ ।
સિંહાક્ષસ્સર્વવિઘ્નેશસ્સામવેદપરાયણઃ ॥ ૭૮॥

સનકાદિમુનિધ્યેયઃ શર્વરીશઃ ષડાનનઃ ।
સુરૂપસ્સુલભસ્સ્વર્ગઃ શચીનાથેન પૂજિતઃ ॥ ૭૯॥

કાકીનઃ કામદહનો દગ્ધપાપો ધરાધિપઃ ।
દામગ્રન્ધી શતસ્ત્રીશસ્તન્ત્રીપાલશ્ચ તારકઃ ॥ ૮૦॥

તામ્રાક્ષસ્તીક્ષ્ણદંષ્ટ્રશ્ચ તિલભોજ્યસ્તિલોદરઃ ।
માણ્ડુકર્ણો મૃડાધીશો મેરુવર્ણો મહોદરઃ ॥ ૮૧॥

માર્તાણ્ડભૈરવારાધ્યો મણિરૂપો મરુદ્વહઃ ।
માષપ્રિયો મધુપાનો મૃણાલો મોહિનીપતિઃ ॥ ૮૨॥

મહાકામેશતનયો માધવો મદગર્વિતઃ ।
મૂલાધારામ્બુજાવાસો મૂલવિદ્યાસ્વરૂપકઃ ॥ ૮૩॥

સ્વાધિષ્ટાનમયઃ સ્વસ્થઃ સ્વસ્થિવાક્યઃ સ્રુવાયુધઃ ।
મણિપૂરાબ્જનિલયો મહાભૈરવપૂજિતઃ ॥ ૮૪॥

અનાહતાબ્જરસિકો હ્રીઙ્કારરસપેશલઃ ।
ભ્રૂમધ્યવાસો ભ્રૂકાન્તો ભરદ્વાજપ્રપૂજિતઃ ॥ ૮૫॥

સહસ્રારામ્બુજાવાસઃ સવિતા સામવાચકઃ ।
મુકુન્દશ્ચ ગુણાતીતો ગુણપૂજ્યો ગુણાશ્રયઃ ॥ ૮૬॥

ધન્યશ્ચ ધનભૃદ્દાહો ધનદાનકરામ્બુજઃ ।
મહાશયો મહાતીતો માયાહીનો મદાર્ચિતઃ ॥ ૮૭॥

માઠરો મોક્ષફલદઃ સદ્વૈરિકુલનાશનઃ ।
પિઙ્ગલઃ પિઞ્છચૂડશ્ચ પિશિતાશપવિત્રકઃ ॥ ૮૮॥

પાયસાન્નપ્રિયઃ પર્વપક્ષમાસવિભાજકઃ ।
વજ્રભૂષો વજ્રકાયો વિરિઞ્ચોવરવક્ષણઃ ॥ ૮૯॥

વિજ્ઞાનકલિકાવૃન્દો વિશ્વરૂપપ્રદર્શકઃ ।
ડમ્ભઘ્નો દમઘોષઘ્નો દાસપાલસ્તપૌજસઃ ॥ ૯૦॥

દ્રોણકુમ્ભાભિષિક્તશ્ચ દ્રોહિનાશસ્તપાતુરઃ ।
મહાવીરેન્દ્રવરદો મહાસંસારનાશનઃ ॥ ૯૧॥

લાકિની હાકિનીલબ્ધો લવણામ્ભોધિતારણઃ ।
કાકિલઃ કાલપાશઘ્નઃકર્મબન્ધવિમોચકઃ ॥ ૯૨॥

મોચકો મોહનિર્ભિન્નો ભગારાધ્યો બૃહત્તનુઃ ।
અક્ષયોઽક્રૂરવરદો વક્રાગમવિનાશનઃ ॥ ૯૩॥

ડાકીનઃ સૂર્યતેજસ્વી સર્પભૂષશ્ચ સદ્ગુરુઃ ।
સ્વતન્ત્રઃ સર્વતન્ત્રેશો દક્ષિણાદિગધીશ્વરઃ ॥ ૯૪॥

સચ્ચિદાનન્દકલિકઃ પ્રેમરૂપઃ પ્રિયઙ્કરઃ ।
મિથ્યાજગદધિષ્ટાનો  મુક્તિદો મુક્તિરૂપકઃ ॥ ૯૫॥

મુમુક્ષુઃ કર્મફલદો માર્ગદક્ષોઽથ કર્મઠઃ ।
મહાબુદ્ધો મહાશુદ્ધઃ શુકવર્ણઃ શુકપ્રિયઃ ॥ ૯૬॥

સોમપ્રિયઃ સ્વરપ્રીતઃ પર્વારાધનતત્પરઃ ।
અજપો જનહંસશ્ચ ફલપાણિપ્રપૂજિતઃ ॥ ૯૭॥

અર્ચિતો વર્ધનો વાગ્મી વીરવેષો વિધુપ્રિયઃ ।
લાસ્યપ્રિયો લયકરો લાભાલાભવિવર્જિતઃ ॥ ૯૮॥

પઞ્ચાનનઃ પઞ્ચગૂઢઃ પઞ્ચયજ્ઞફલપ્રદઃ ।
પાશહસ્તઃ પાવકેશઃ પર્જન્યસમગર્જનઃ ॥ ૯૯॥

પપારિઃ પરમોદારઃ પ્રજેશઃ પઙ્કનાશનઃ ।
નષ્ટકર્મા નષ્ટવૈર ઇષ્ટસિદ્ધિપ્રદાયકઃ ॥ ૧૦૦॥

નાગાધીશો નષ્ટપાપ ઇષ્ટનામવિધાયકઃ ।
પઞ્ચકૃત્યપરઃ પાતા પઞ્ચપઞ્ચાતિશાયિકઃ ॥ ૧૦૧॥

પદ્માક્ષોઃ પદ્મવદનઃ પાવકાભઃ પ્રિયઙ્કરઃ ।
કાર્તસ્વરાઙ્ગો ગૌરાઙ્ગો ગૌરીપુત્રો ધનેશ્વરઃ ॥ ૧૦૨॥

ગણેશાશ્લિષ્ટદેહશ્ચ શીતાંશુઃ શુભદીદિતિઃ ।
દક્ષધ્વંસો દક્ષકરો વરઃ કાત્યાયનીસુતઃ ॥ ૧૦૩॥

સુમુખો માર્ગણો ગર્ભો ગર્વભઙ્ગઃ કુશાસનઃ ।
કુલપાલપતિઃ શ્રેષ્ઠો પવમાનઃ પ્રજાધિપઃ ॥ ૧૦૪॥

દર્શપ્રિયો નિર્વિકારો દીર્ઘકાયો દિવાકરઃ ।
ભેરીનાદપ્રિયો વૃન્દો બૃહત્સેનઃ સુપાલકઃ ॥ ૧૦૫॥

સુબ્રહ્મા બ્રહ્મરસિકો રસજ્ઞો રજતાદ્રિભાઃ ।
તિમિરઘ્નો મિહિરાભો મહાનીલસમપ્રભઃ ॥ ૧૦૬॥

શ્રીચન્દનવિલિપ્તાઙ્ગઃ શ્રીપુત્રઃશ્રીતરુપ્રિયઃ ।
લાક્ષાવર્ણો લસત્કર્ણો રજનીધ્વંસિસન્નિભઃ ॥ ૧૦૭॥

બિન્દુપ્રિયોઽમ્બિકાપુત્રો બૈન્દવો બલનાયકઃ ।
આપન્નતારકસ્તપ્તસ્તપ્તકૃચ્છ્રફલપ્રદઃ ॥ ૧૦૮॥

મરુદ્ધૃતો મહાખર્વશ્ચીરવાસાઃ શિખિપ્રિયઃ ।
આયુષ્માનનઘો દૂત આયુર્વેદપરાયણઃ ॥ ૧૦૯॥

હંસઃ પરમહંસશ્ચાપ્યવધૂતાશ્રમપ્રિયઃ ।
અશ્વવેગોઽશ્વહૃદયો હયધૈર્યો ફલપ્રદઃ ॥ ૧૧૦॥

સુમુખો દુર્મુખો વિઘ્નોનિર્વિઘ્નો વિઘ્નનાશનઃ ।
આર્યો નાથોઽર્યમાભાસઃફાલ્ગુનઃ ભાલલોચનઃ ॥ ૧૧૧॥

અરાતિઘ્નો ઘનગ્રીવો ગ્રીષ્મસૂર્યસમપ્રભઃ ।
કિરીટી કલ્પશાસ્ત્રજ્ઞઃ કલ્પાનલવિધાયકઃ ॥ ૧૧૨॥

જ્ઞાનવિજ્ઞાનફલદો વિરિઞ્ચારિવિનાશનઃ ।
વીરમાર્ત્તાણ્ડવરદો વીરબાહુશ્ચ પૂર્વજઃ ॥ ૧૧૩॥

વીરસિંહાસનો વિજ્ઞો વીરકાર્યોઽસ્તદાનવઃ ।
નરવીરસુહૃદ્ભ્રાતા નાગરત્નવિભૂષિતઃ ॥ ૧૧૪॥

વાચસ્પતિઃ પુરારાતિઃ સંવર્ત્તઃ સમરેશ્વરઃ ।
ઉરુવાગ્મીહ્યુમાપુત્રઃ ઉડુલોકસુરક્ષકઃ ॥ ૧૧૫॥

શ‍ૃઙ્ગારરસસમ્પૂર્ણઃ સિન્દૂરતિલકાઙ્કિતઃ ।
કુઙ્કુમાઙ્કિતસર્વાઙ્ગઃ કાલકેયવિનાશનઃ ॥ ૧૧૬॥

મત્તનાગપ્રિયો નેતા નાગગન્ધર્વપૂજિતઃ ।

સુસ્વપ્નબોધકો બોધો ગૌરીદુસ્વપ્નનાશનઃ ॥ ૧૧૭॥

ચિન્તારાશિપરિધ્વંસી ચિન્તામણિવિભૂષિતઃ ।
ચરાચરજગત્સ્રષ્ટા ચલત્કુણ્ડલકર્ણયુક્ ॥ ૧૧૮॥

મુકુરાસ્યો મૂલનિધિર્નિધિદ્વયનિષેવિતઃ ।
નીરાજનપ્રીતમનાઃ નીલનેત્રો નયપ્રદઃ ॥ ૧૧૯॥

કેદારેશઃ કિરાતશ્ચ કાલાત્મા કલ્પવિગ્રહઃ ।
કલ્પાન્તભૈરવારાધ્યઃ કઙ્કપત્રશરાયુધઃ ॥ ૧૨૦॥

કલાકાષ્ઠસ્વરૂપશ્ચ  ઋતુવર્ષાદિમાસવાન્ ।
દિનેશમણ્ડલાવાસો વાસવાદિપ્રપૂજિતઃ ॥ ૧૨૧॥

બહુલાસ્તમ્બકર્મજ્ઞઃ પઞ્ચાશદ્વર્ણરૂપકઃ ।
ચિન્તાહીનશ્ચિદાક્રાન્તઃ ચારુપાલોહલાયુધઃ ॥ ૧૨૨॥

બન્દૂકકુસુમપ્રખ્યઃ પરગર્વવિભઞ્જનઃ ।
વિદ્વત્તમો વિરાધઘ્નઃ સચિત્રશ્ચિત્રકર્મકઃ ॥ ૧૨૩॥

સઙ્ગીતલોલુપમનાઃ સ્નિગ્ધગમ્ભીરગર્જિતઃ ।
તુઙ્ગવક્ત્રઃ સ્તવરસશ્ચાભ્રાભો ભ્રમરેક્ષણઃ ॥ ૧૨૪॥

લીલાકમલહસ્તાબ્જો બાલકુન્દવિભૂષિતઃ ।
લોધ્રપ્રસવશુધાભઃ શિરીષકુસુમપ્રિયઃ ॥ ૧૨૫॥

ત્રસ્તત્રાણકરસ્તત્ત્વં તત્ત્વવાક્યાર્થબોધકઃ ।
વર્ષીયાંશ્ચ વિધિસ્તુત્યો વેદાન્તપ્રતિપાદકઃ ॥ ૧૨૬॥

મૂલભૂતો મૂલતત્ત્વં મૂલકારણવિગ્રહઃ ।
આદિનાથોઽક્ષયફલઃ પાણિજન્માઽપરાજિતઃ ॥ ૧૨૭॥

ગાનપ્રિયો ગાનલોલો મહેશો વિજ્ઞમાનસઃ ।
ગિરીજાસ્તન્યરસિકો ગિરિરાજવરસ્તુતઃ ॥ ૧૨૮॥

પીયૂષકુમ્ભહસ્તાબ્જઃ પાશત્યાગી ચિરન્તનઃ ।
સુધાલાલસવક્ત્રાબ્જઃ સુરદ્રુમફલેપ્સિતઃ ॥ ૧૨૯॥

રત્નહાટકભૂષાઙ્ગો રાવણાદિપ્રપૂજિતઃ ।
કનત્કાલેયસુપ્રીતઃ ક્રૌઞ્ચગર્વવિનાશનઃ ॥ ૧૩૦॥

અશેષજનસમ્મોહ આયુર્વિદ્યાફલપ્રદઃ ।
અવબદ્ધદુકૂલાઙ્ગો હારાલઙ્કૃતકન્ધરઃ ॥ ૧૩૧॥

કેતકીકુસુમપ્રીતઃ કલભૈઃ પરિવારિતઃ ।
કેકાપ્રિયઃ કાર્તિકેયઃ સારઙ્ગનિનદપ્રિયઃ ॥ ૧૩૨॥

ચાતકાલાપસન્તુષ્ટશ્ચમરીમૃગસેવિતઃ ।
આમ્રકૂટાદ્રિસઞ્ચારી ચામ્નાયફલદાયકઃ ॥ ૧૩૩॥

ધૃતાક્ષસૂત્રપાણિશ્ચાપ્યક્ષિરોગવિનાશનઃ ।
મુકુન્દપૂજ્યો મોહાઙ્ગો મુનિમાનસતોષિતઃ ॥ ૧૩૪॥

તૈલાભિષિક્તસુશીરાસ્તર્જનીમુદ્રિકાયુતઃ ।
તટાતકામનઃ પ્રીતસ્તમોગ◌ુણવિનાશનઃ ॥ ૧૩૫॥

અનામયોઽપ્યનાદર્શશ્ચાર્જુનાભો હુતપ્રિયઃ ।
ષાડ્ગુણ્ય પરિસમ્પૂર્ણસ્સપ્તાશ્વાદિગૃહૈઃ સ્તુતઃ ॥ ૧૩૬॥

વીતશોકઃપ્રસાદજ્ઞઃ સપ્તપ્રાણવરપ્રદઃ ।
સપ્તાર્ચિશ્ચ ત્રિનયનસ્ત્રિવેણીફલદાયકઃ ॥ ૧૩૭॥

કૃષ્ણવર્ત્મા વેદમુખો દારુમણ્ડલમધ્યગઃ ।
વીરનૂપુરપાદાબ્જો વીરકઙ્કણપાણિમાન્ ॥ ૧૩૮॥

વિશ્વમૂર્તિશ્શુદ્ધમુખશ્શુદ્ધભસ્માનુલેપનઃ ।
શુમ્ભધ્વંસિન્યા સમ્પૂજ્યો રક્તબીજકુલાન્તકઃ ॥ ૧૩૯॥

નિષાદાદિસ્વરપ્રીતઃ નમસ્કારફલપ્રદઃ ।
ભક્તારિપઞ્ચતાદાયી સજ્જીકૃતશરાયુધઃ ॥ ૧૪૦॥

અભયઙ્કરમન્ત્રજ્ઞઃ કુબ્જિકામન્ત્રવિગ્રહઃ ।
ધૂમ્રાક્ષશ્ચોગ્રતેજસ્વી દશકણ્ઠવિનાશનઃ ॥ ૧૪૧॥

આશુગાયુધહસ્તાબ્જો ગદાયુધકરામ્બુજઃ ।
પાશાયુધસુપાણિશ્ચ કપાલાયુધસદ્ભુજઃ ॥ ૧૪૨॥

સહસ્રશીર્ષવદનઃ સહસ્રદ્વયલોચનઃ ।
નાનાહેતિર્ધનુષ્પાણિઃ નાનાસ્રગ્ભૂષણપ્રિયઃ ॥ ૧૪૩॥

આશ્યામકોમલતનૂરારક્તાપાઙ્ગલોચનઃ ।
દ્વાદશાહક્રતુપ્રીતઃ પૌણ્ડરીકફલપ્રદઃ ॥ ૧૪૪॥

અગ્નોર્યામક્રતુમયશ્ચયનાદિફલપ્રદઃ ।
પશુબન્ધસ્યફલદો વાજપેયાત્મદૈવતઃ ॥ ૧૪૫ ॥

આબ્રહ્મકીટજનનાવનાત્મા ચમ્બકપ્રિયઃ ।
પશુપાશવિભાગજ્ઞઃ પરિજ્ઞાનપ્રદાયકઃ ॥ ૧૪૬ ॥

કલ્પેશ્વરઃ કલ્પવર્યો જાતવેદા પ્રભાકરઃ ।
કુમ્ભીશ્વરઃ કુમ્ભપાણીઃ કુઙ્કુમાક્તલલાટકઃ ॥ ૧૪૭ ॥

શિલીન્ધ્રપત્રસઙ્કાશઃ સિંહવક્ત્રપ્રમર્દનઃ ।
કોકિલક્વણનાકર્ણી કાલનાશનતત્પરઃ ॥ ૧૪૮ ॥

નૈય્યાયિકમતઘ્નશ્ચ બૌદ્ધસઙ્ઘવિનાશનઃ ।
ધૃતહેમાબ્જપાણિશ્ચ હોમસન્તુષ્ટમાનસઃ ॥ ૧૪૯ ॥

પિતૃયજ્ઞસ્યફલદઃ પિતૃવજ્જનરક્ષકઃ ।
પદાતિકર્મનિરતઃ પૃષદાજ્યપ્રદાયકઃ ॥ ૧૫૦ ॥

મહાસુરવધોદ્યુક્તઃ સ્વાસ્ત્રપ્રત્યસ્ત્રવર્ષકઃ ।
મહાવર્ષતિરોધાનઃ નાગાભૃતકરામ્બુજઃ ॥ ૧૫૧ ॥

નમઃ સ્વાહાવષટ્ વૌષટ્ વલ્લવપ્રતિપાદકઃ ।
મહીરસદૃશગ્રીવો મહીરસદૃશસ્તવઃ ॥ ૧૫૨ ॥

તન્ત્રીવાદનહસ્તાગ્રઃ સઙ્ગીતપ્રીતમાનસઃ ।
ચિદંશમુકુરાવાસો મણિકૂટાદ્રિ સઞ્ચરઃ ॥ ૧૫૩ ॥

લીલાસઞ્ચારતનુકો લિઙ્ગશાસ્ત્રપ્રવર્તકઃ ।
રાકેન્દુદ્યુતિસમ્પન્નો યાગકર્મફલપ્રદઃ ॥ ૧૫૪ ॥

મૈનાકગિરિસઞ્ચારી મધુવંશવિનાશનઃ ।
તાલખણ્ડપુરાવાસઃ તમાલનિભતૈજસઃ ॥ ૧૫૫ ॥

શ્રીધર્મશાસ્તાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded George Mathew george.seagull at gmail.com
Proofread by George Mathew, PSA Easwaran

*Dharmashasta or Harihara SahasranAmastotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*